# आदर्श-प्रश्न-पत्रम्-2019-20

## कक्षा : दशमी

## संस्कृतम् (122)

## मॉडल पेपर-5

**समयः- होरात्रयम्** **सम्पूर्णांकाः-80**

**सामान्यनिर्देशाः-**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यं लेखनीयः।
4. अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्-**

| | |
|---|---|
| **खण्ड : क : अपठित-अवबोधनम्** | **10 अंकाः** |
| **खण्ड : ख : रचनात्मककार्यम्** | **15 अंकाः** |
| **खण्ड : ग : अनुप्रयुक्तव्याकरणम्** | **25 अंकाः** |
| **खण्ड : घ : पठित-अवबोधनम्** | **30 अंकाः** |

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
(iii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
(v) प्रश्नानाम् निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

## खण्डः - क 10 अंकाः

## अपठित-अवबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 10**

एकदा एकस्य मूषकस्य मण्डूकेन सह मैत्री अभवत्। उभौ परस्परं वार्तासु रतौ समयं नयतः स्म। एकस्मिन् दिवसे ताभ्यां विचारितं यदत्र आवयोः भोजनमपि सुलभं नास्ति। अन्यत्र गत्वा जीविकोपार्जनं कृत्वा जीवनयापनं कुर्वः इति अवधार्य उभौ प्राचलताम्। मार्गे मण्डूकोऽवदत्-यदि दृढेन सूत्रेण आवयोः शरीरे बद्धे स्याताम्, तदा वियोगो न भविष्यति। सर्वत्र सहैव गमिष्यावः। मूषकेण मण्डूकस्य वचः अभिनन्दितम्। इदानीं सूत्रेण शरीरे निबध्य तौ यात्रामार्गे शनैः शनैः प्रसरतः स्म। एकः सर्पः तौ अपश्यत् सः तौ प्रति प्रासरत्। धावत्रे असमर्थौ तौ सर्पेण भक्षितौ। नूनं बुद्धिहीनः विनश्यति।

1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) $1 \times 2 = 2$
   (i) मूषकस्य केन सह मैत्री अभवत्?
   (ii) कः विनश्यति?
   (iii) कः तौ अपश्यत्?

2. पूर्णवाक्येन लिखत- (केवलं प्रश्नद्वयम्) $2 \times 2 = 4$
   (i) मार्गे मण्डूकः किम् अवदत्?
   (ii) उभौ कथं समयं नयतः स्म?
   (iii) केन मण्डूकस्य वचः अभिनन्दितम्?

3. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1

4. यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'नयतः' इति क्रियापदस्य कर्तृपदं किम्?
   (क) वार्तासु
   (ख) उभौ
   (ग) मैत्री
   (ii) 'सूत्रेण' इति पदस्य विशेषणपदं गद्याशे किम् प्रयुक्तम्?
   (क) यदि
   (ख) आवयोः
   (ग) दृढेन
   (iii) 'दुर्लभं' इति पदस्य विलोमपदं गद्यांशे किम् प्रयुक्तम्?
   (क) भोजनम्
   (ख) सुलभम्
   (ग) यापनम्

(iv) 'देहे' इति पदस्य पर्यायपदं गद्यांशे किम् प्रयुक्तम्?
(क) शरीरे
(ख) मूषके
(ग) मार्गे

**उत्तरम् :**

1. (i) मण्डूकेन
(ii) बुद्धिहीनः
(iii) सर्पः
2. (i) मार्गे मण्डूकः अवदत्– 'यदि दृढेन सूत्रेण आवयोः शरीरे बद्धे स्याताम्, तदा वियोगो न भविष्यति। सर्वत्र सहैव गमिष्यावः।'
(ii) उभौ परस्परं वार्तासु रतौ समयं नयतः स्म।
(iii) मूषकेण मण्डूकस्य वचः अभिनन्दितम्।
3. **शीर्षक–** बुद्धेः महत्त्वम्, बुद्धिहीनः विनश्यति।
4. (i) (ख) उभौ
(ii) (ग) दृढेन
(iii) (ख) सुलभम्
(iv) (क) शरीरे

## खण्डः – ख 15 अंकाः

## रचनात्मककार्यम्

**2. भवान् उमेशः। मुम्बईनगरे छात्रावासे स्थित्वा अध्ययनं करोति। छात्रावासे स्वदिनचर्यायाः वर्णनम् कुर्वन् स्वमातरं प्रति लिखितं पत्रं पूरयित्वा पुनः लिखत। शब्दचयनं मञ्जूषातः कुरुत–** $1/2 \times 10 = 5$

(1) ..........
तिथिः ..........
पूजनीये मातः
सादरं प्रणामाः।
अहम् अत्र कुशलः। भवत्याः पत्रम् प्राप्य मनसि (2) .......... जातः यत् पितृमहोदयः इदानीम् (3) .......... स्वस्थोऽस्ति। सः मम स्वास्थ्यस्य (4) .......... च विषये चिंतितः आसीत्। परं चिन्तायाः न कोऽपि विषयः। अहम् प्रतिदिनं प्रातः चतुर्वादने (5) .......... व्यायामं कृत्वा (6) .......... पठामि। ततः स्नात्वा दुग्धादिकं च पीत्वा पादोनसप्त –वादने विद्यालयं गच्छामि। द्विवादने (7) .......... आगत्य भोजनं कृत्वा विश्रामं करोमि। सार्ध–चतुर्वादने उत्थाय गृहकार्यं करोमि। संस्कृतविषये अहम् (8) .......... परिश्रमं करोमि। पितृमहाभागानाम (9) .......... प्रणामाः कथनीयाः।
भवत्याः प्रियः पुत्रः
(10) .........।

| मञ्जूषा |
|---|
| विद्यालयात्, सन्तोषः, अध्ययनस्य, घण्टाद्वयम्, विशेषतया, चरणयोः, छात्रावासतः, उत्थाय, उमेशः, पूर्णरूपेण |

**उत्तरम् :**

(1) **छात्रावासतः**
तिथिः ..........
पूजनीये मातः
सादरं प्रणामाः।
अहम् अत्र कुशलः। भवत्याः पत्रम् प्राप्य मनसि (2) **सन्तोषः** जातः यत् पितृमहोदयः इदानीम् (3) **पूर्णरूपेण** स्वस्थोऽस्ति। सः मम स्वास्थ्यस्य (4) **अध्ययनस्य** च विषये चिंतितः आसीत्। परं चिन्तायाः न कोऽपि विषयः। अहम् प्रतिदिनं प्रातः चतुर्वादने (5) **उत्थाय** व्यायामं कृत्वा (6) **घण्टाद्वयम्** पठामि। ततः स्नात्वा दुग्धादिकं च पीत्वा पादोनसप्त–वादने विद्यालयं गच्छामि। द्विवादने (7) **विद्यालयात्** आगत्य भोजनं कृत्वा विश्रामं करोमि। सार्ध–चतुर्वादने उत्थाय गृहकार्यं करोमि। संस्कृतविषये अहम् (8) **विशेषतया** परिश्रमं करोमि। पितृमहाभागानाम (9) **चरणयोः** प्रणामाः कथनीयाः।
भवत्याः प्रियः पुत्रः
(10) **उमेशः**।

**3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–** $1 \times 5 = 5$



| |
|---|
| **मञ्जूषा–**पञ्जरे, द्वैत्वासिके, इतस्ततः, अनेके, पश्यन्ति, जन्तुशालायाः, दृश्यन्ते, प्रसीदन्ति, जन्तवः, गण्डकः, मयूरः, पुरुषः, उष्ट्रग्रीवः, महिला, सह, दर्शकाः, बालाः, सिंहः। |

**उत्तरम् :**

1. एतत् जन्तुशालायाः चित्रम् अस्ति।
2. अत्र पञ्जरे सिंहः, गण्डकः, मयूरः, हरिणः उष्ट्रग्रीवः इत्यादयः अनेके जन्तवः दृश्यन्ते।
3. दर्शकाः इतस्ततः भ्रमन्ति।
4. पुरुषः महिला च बालैः सह जन्तून् दृश्यन्ते।
5. सर्वे बालाः तान् दृष्ट्वा प्रसीदन्ति।

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत–** $1 \times 5 = 5$

"मम जननी"

| |
|---|
| **मञ्जूषा**–चतुर्वादने, एकाकी, स्निह्यति, महिला, विज्ञानस्य, मयि, करोति, अध्यापयति, परिश्रमी, अस्मि, गृहकार्यम्, उत्तिष्ठति, स्नेहेन, पालयति। |

**उत्तरम् :**

**मम जननी**

मम जननी एका परिश्रमी महिला अस्ति। सा प्रातःकाले चतुर्वादने उत्तिष्ठति, गृहकार्यं च करोति। सा विज्ञानस्य अध्यापिका अस्ति। सा माम् स्नेहेन पालयति। सा प्रतिदिनं माम् अध्यापयति।

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत– (केवलं वाक्यपञ्चकम्)** $1 \times 5 = 5$

1. बिल्ली को दूध पसंद है।
   A cat likes milk.
2. चालाक सियार की कहानी बताओ।
   Tell the story of cunning jackal.
3. हमें 1947 में आजादी मिली।
   We got freedom in 1947.
4. जो पेड़ काटा जाता है वह पुनः बढ़ता है।
   The tree which is cut grows again.
5. अपनी प्रसिद्धी को हमेशा बढ़ने दे।
   Let your fame ever increase.
6. बादल बरसते है।
   Clouds rain.
7. अच्छे लोग न्याय का रास्ता कभी नहीं छोड़ते।
   The good people never give up the just path.

**उत्तरम् :**

1. बिडालाय दुग्धं रोचते।
2. धूर्तशृगालस्य कथां कथय।
3. सप्तचतुर्नवैकतमे ख्रिस्ताब्दे वयं स्वातन्त्र्यम् अलभामहि।/ सप्तचतुर्नवैकतमे ख्रिस्ताब्दे अस्माभिः स्वातन्त्र्यं लब्धम्।
4. छिन्नः द्रुमः/वृक्षः/पादपः पुनः वर्धते।
5. सदैव वितनोतु ते कीर्तिः।/निरन्तरं वर्धतां तव कीर्तिः।
6. घनाः/मेघाः/पयोदाः वर्षन्ति।
7. न न्याय्यमार्गात् विरमन्ति सज्जनाः/धीराः।/न्याय्यात् मार्गात् पदं न विचलन्ति धीराः।

**खण्डः ग** **25 अंकाः**

## अनुप्रयुक्त्व्याकरणम्

**5. अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेंद वा कुरुत– (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. उत्सुकाः वयम् <u>एतम् + पाठं</u> पठितुम्।

**उत्तरम् :** एतं पाठं

2. <u>गुरुं प्रति</u> गच्छ अध्ययनार्थम्।

**उत्तरम् :** गुरुम् + प्रति

3. कालः पिबति <u>तत् + रसम्</u>।

**उत्तरम् :** तद्रसम्

4. न तु वित्तस्य <u>सञ्चयात्</u>।

**उत्तरम् :** सम् + चयात्

5. <u>काष्ठात् + अग्निः</u> जायते मथ्यमानाद्।

**उत्तरम् :** काष्ठादग्निः

**6. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. तत्र राजसिंहः नाम <u>राजपुत्रः</u> वसति स्म।
   (क) राज्ञः पुत्रः
   (ख) राज्ञे पुत्रः
   (ग) राज्ञा पुत्रः

**उत्तरम् :** (क) राज्ञः पुत्रः

2. महात्मा गाँधी भारतवर्षस्य <u>प्रतिग्रामम्</u> अगच्छत।
   (क) प्रति ग्रामं ग्रामम्
   (ख) प्रति ग्रामः
   (ग) ग्रामम् ग्रामम् प्रति

**उत्तरम् :** (ग) ग्रामम् ग्रामम् प्रति

3. वसन्ते आगते <u>पिकः च काकः च तयोः</u> कः भेदः?
   (क) पिककाकौ
   (ख) पिककाके
   (ग) पिककाकयोः

**उत्तरम् :** (ग) पिककाकयोः

4. <u>समयम् अनतिक्रम्य</u> विद्यालयम् आगन्तव्यम्।
   (क) यथासमयः
   (ख) यथासमया
   (ग) यथासमयम्

**उत्तरम् :** (ग) यथासमयम्

5. <u>वसिष्ठविश्वामित्रौ</u> आचार्यौ आस्ताम्।
   (क) वसिष्ठौ च विश्वामित्रौ च
   (ख) वसिष्ठः च विश्वामित्रौ च
   (ग) वसिष्ठ विश्वामित्रश्च

**उत्तरम् :** (ग) वसिष्ठ विश्वामित्रश्च

**7. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति–प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. अहमेव <u>जननी</u> पक्षिणाम्।
   (क) जनन+ङीप्

(ख) जनन+इन्

(ग) जन+नी

**उत्तरम् :** (क) जनन+ङीप्

2. दैवगतिः खलु विचित्र + टाप्।

(क) विचित्रा

(ख) विचित्रता

(ग) विचित्रतम्

**उत्तरम् :** (क) विचित्रा

3. धनवान् नरः सर्वत्र मानं लभते।

(क) धन+मतुप्

(ख) धने+मतुप्

(ग) धन+मान्

**उत्तरम् :** (क) धन+मतुप्

4. अस्य पिता किं तपः तेपे इति उक्तिः तत् कृतज्ञ + तल् अस्ति।

(क) कृतज्ञता

(ख) कृतज्ञताम्

(ग) कृतज्ञताः

**उत्तरम् :** (क) कृतज्ञता

5. वेदानां नित्य + त्व साधितवान्।

(क) नित्यता

(ख) नित्यत्व

(ग) नित्यत्वं

**उत्तरम् :** (ग) नित्यत्वं

**8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत–** $1 \times 3 = 3$

शिक्षकः– किं त्वं ग्रन्थं पठसि?

छात्रः– आम्! मया (1) .......... पठयते

शिक्षकः– किं रविः लेखं लिखति?

छात्रः– आम्! (2) .......... लेखः लिख्यते।

शिक्षकः– भानुना किं (3) ..........?

छात्रः– भानुः पठति।

| मञ्जूषा |
|---|
| क्रियते, रविणा, ग्रन्थः। |

**उत्तरम् :**

1. ग्रन्थः
2. रविणा
3. क्रियते

**अथवा**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत (केवलं त्रयाणाम्)–**

1. लक्ष्मीमेव प्रथमम् आलोकयति।
2. न परिचयं रक्षति।
3. नाभिजनमीक्षते।
4. न शीलं पश्यति।
5. न वैदग्ध्यं गणयति।

**उत्तरम् :**

1. लक्ष्मीः प्रथमम् अवलोक्यते।
2. न परिचयः रक्ष्यते।
3. न अभिजनः इक्ष्यते।
4. न शीलं दृश्यते।
5. न वैदग्ध्यं गण्यते।

**9. कालबोधकशब्दैः अधोलिखित– दिनचर्यां वा पूरयत– (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. प्रातः 6:00 ........ वादने प्रशिक्षार्थम गच्छन्ति।
2. प्रातः 7:00 .......... वादने प्रशिक्षकः तत्र आगच्छति।
3. प्रातः 7:45 .......... वादने क्रीडकाः आगच्छति।
4. प्रातः 8:30 .......... वादने तैः धावनस्य अभ्यासः क्रियते।
5. प्रातः 9:15 .......... वादने सर्वे स्वगृहं गच्छति।

**उत्तरम् :**

1. षड्
2. सप्त
3. पादोन–अष्ट
4. सार्ध–अष्ट
5. सपाद–नव

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत– (केवलं प्रश्नषटकम्)** $1/2 \times 6 = 3$

1. रात्रौ कुक्कुराः .......... भ्रमन्ति।
2. त्वम् .......... गृहम् गच्छ।
3. त्वं ......... भोजनं खादसि।
4. ........ मंगलवासरः आसीत्।
5. ......... अहं देवालयं गच्छामि।
6. समुद्रेषु वृष्टिः ..........।
7. ......... मम विद्यालयस्य अवकाशः अस्ति।
8. कदापि .......... किमपि कार्यं न विधेयम्।

| मञ्जूषा |
|---|
| शनैः, वृथा, ह्यः, अपि, सहसा, इतस्ततः, अद्य, अधुना |

**उत्तरम् :**

1. इतस्ततः
2. अपि
3. शनैः
4. ह्यः
5. अधुना
6. वृथा

7. अद्य
8. सहसा

**11. अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नत्रयम्)**

$1 \times 3 = 3$

1. 'एते सर्वे मम मित्रम् सन्ति।' (मित्राः/ मित्राणि/मित्रः)
2. 'त्वं पाठम् अपठत्।' (अपठः/अपठताम्/अपठतम्)
3. 'ते फलानि पतन्ति।' (ताः/सा/तानि)
4. 'ह्य अस्माकं विद्यालये वार्षिकोत्सवः भविष्यति।' (अभवत्/अभवः/भवेत्)

**उत्तरम् :**

1. मित्राणि।
2. अपठः।
3. तानि।
4. अभवत्

## खण्डः – घ 30 अंकाः

## पठित–अवबोधनम्

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 5**

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषः नोत्थितः।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) कृषकः काभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्?
   (ii) कः क्षेत्रे पपात?
   (iii) क्रुद्धः कृषकः कम् उत्थापयितुं यत्नमकरोत्?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) बलीवर्दयोः एकः कीदृशः आसीत्?
   (ii) कृषकः कम् तोदनेन नुद्यमानः अवर्तत?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'अनेकवारम्' इतस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?
   (क) नुद्यमानः
   (ख) बहुवारम्
   (ग) हलमूढ्वा
   (ii) 'वृषभम्' इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम्?
   (क) क्षेत्रकर्षणम्
   (ख) गन्तुम्
   (ग) दुर्बलम्
   (iii) 'कृषीवलः' इति पदस्य किं क्रियापदं गद्यांशे प्रयुक्तम्?
   (क) अवर्तत
   (ख) अकरोत्
   (ग) पपात
   (iv) 'पपात' क्रियायाः कर्तृपदं किम्?
   (क) वृषभः
   (ख) कृषकः
   (ग) क्षेत्रम्

**उत्तरम् :**

1. (i) बलीवर्दाभ्याम्।
   (ii) वृषभः।
   (ii) वृषभम्।
2. (i) बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्।
   (ii) कृषकः दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत।
3. (i) (ख) बहुवारम्
   (ii) (ग) दुर्बलम्
   (iii) (ख) अकरोत्
   (iv) (क) वृषभः

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 5**

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) मनुष्याणां शरीरस्थः महान् शत्रुः कः?
   (ii) केन समः बन्धुः नास्ति?
   (iii) किं कृत्वा मनुष्यः न अवसीदति?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) आलस्यं मनुष्याणां कीदृशः रिपुः वर्तते?
   (ii) किं कृत्वा जनः कदापि दुःखं न अनुभवति?
3. निर्देशानुसारम् उत्तरत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'बन्धुः' इति कर्तृपदस्य क्रियापदं किम्?
   (क) न अस्ति
   (ख) अवसीदति
   (ग) रिपुः
   (ii) 'महान् रिपुः' अनयोः पदयोः किं विशेष्य पदम्?
   (क) महान्
   (ख) रिपुः
   (ग) उभौ
   (iii) 'परिश्रमः' इत्यस्य पदस्य कः पर्यायः श्लोके प्रयुक्तम्?
   (क) उद्यमः
   (ख) आलस्यम्
   (ग) रिपुः
   (iv) 'रिपुः' इत्यस्य किं विलोमपदं श्लोके प्रयुक्तम्?
   (क) बन्धुः

(ख) शत्रुः

(ग) कृत्वा

**उत्तरम् :**

1. (i) आलस्यम्।
(ii) उद्यमेन।
(iii) उद्यमम्
2. (i) आलस्यं मनुष्याणां शरीरस्थः महान् रिपुः वर्तते।
(ii) परिश्रमं कृत्वा जनः कदापि दुःखं न अनुभवति।
3. (i) (क) न अस्ति।
(ii) (ख) रिपुः
(iii) (क) उद्यमः
(iv) (क) बन्धुः

**14. अधोलिखितं नाटयांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 5**

विदूषकः–एतयोर्यदि पितुर्निरनुक्रोश इति नामधेयम् एतयोर्जननी तेनावमानिता निर्वासिता एतेन वचनेन दारकौ निर्भर्त्सयति।

रामः–(स्वगतम्)धिङ् मामेवंभूतम्। सा तपस्विनी मत्कृ तेनापराधेन स्वापत्यमेवं मन्युगर्भैरक्षरैर्निर्भर्त्सयति।

**(सवाष्पमवलोकयति)**

रामः–अतिदीर्घः प्रवासोऽयं दारूणश्च। (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि। न युक्तं च स्त्रीगतमनुयोक्तुम् विशेषतस्तपोवने। तत् कोऽत्राभ्युपायः?

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
(i) "धिङ् मामेवंभूतम्" – इति कथनं कस्य?
(ii) कुशलवयोः मातरं नामतो वेदितुं कः इच्छति?
(iii) कः अतिदीर्घः दारुणश्च?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
(i) कस्यापराधेन तपस्विनी स्वापत्यं निर्भर्त्सयति?
(ii) रामस्य प्रवासः कीदृशः आसीत्?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
(i) "निर्भर्त्सयति" इति क्रियापदस्य कर्तृपदं किम्?
(क) विदूषकः
(ख) माता
(ग) रामः
(ii) "अतिदीर्घः प्रवासः" इत्यत्र विशेष्य पदं किम्?
(क) अतिदीर्घः
(ख) तपस्विनी
(ग) प्रवासः
(iii) 'सम्मानिता' इत्यस्य किं विलोम पदं नाट्यांशे प्रयुक्तम्?
(क) अवमानिता
(ख) अवलोक्य
(ग) दारूणः
(iv) 'सा तपस्विनी' इति कर्तृपदस्य क्रियापदं नाट्यांशे किं प्रयुक्तम्?
(क) निर्भर्त्सयति
(ख) अवलोकयति
(ग) इच्छामि

**उत्तरम् :**

1. (i) रामस्य।
(ii) रामः।
(iii) प्रवासः।
2. (i) रामस्य अपराधेन तपस्विनी स्वापत्यं निर्भर्त्सयति।
(ii) रामस्य प्रवासः अतिदीर्घः दारुणश्च आसीत्।
3. (i) (ख) माता
(ii) (ग) प्रवासः
(iii) (क) अवमानिता
(iv) (क) निर्भर्त्सयति

**15. रेखांकित–पदानि आधृत्य प्रश्ननिर्माणं कुरुत– (केवलं प्रश्नचतुष्ट्यम्) $1 \times 4 = 4$**

1. सिंहः वानराभ्यां स्वरक्षायाम् असमर्थः एवासीत्।
2. गजः वन्यपशून् तुदन्तं शुण्डेन पोथयित्वा मारयति।
3. वानरः आत्मानं वनराजपदाय योग्यः मन्यते।
4. मयूरस्य नृत्यं प्रकृतेः आराधना।
5. सर्वे प्रकृतिमातरं प्रणमन्ति।

**उत्तरम् :**

1. सिंहः वानराभ्यां कस्याम् असमर्थः एवासीत्?
2. गजः वन्यपशून् तुदन्तं केन पोथयित्वा मारयति?
3. वानरः आत्मानं कस्मै योग्यः मन्यते?
4. मयूरस्य नृत्यं कस्याः आराधना?
5. सर्वे काम् प्रणमन्ति?

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित–श्लोकयोः अन्वयं पूरयत– $1/2 \times 4 = 2$**

I. व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम्।
विदग्धमविदग्धं वा निर्दोषं परिपच्यते।।
**अन्वयः**– नित्यं (1) .......... कुर्वतः विदग्धम् (2) .......... वा विरूद्धम् अपि (3) .......... निर्दोषं (4) ..........।

II. विनिपातो न वः कश्चिद् दृश्यते त्रिदशाधिपः।
अहं तु पुत्रं शोचामि, तेन रोदिमि कौशिक!।। $1/2 \times 4 = 2$
**अन्वयः**– त्रिदशाधिपः वः (1) .......... विनिपातः न (2) ..........। कौशिक! अहं तु (3) .......... शोचामि, तेन (4) ..........।

| मञ्जूषा |
|---|
| अविदग्धं, परिपच्यते, भोजनं, व्यायामं, पुत्रं, कश्चिद्, रोदिमि, दृश्यते। |

**उत्तरम् :**

I **अन्वयः** (1) व्यायामं, (2) अविदग्धं, (3) भोजनं, (4) परिपच्यते।

II **अन्वयः** (1) कश्चिद्, (2) दृश्यते, (3) पुत्रं, (4) रोदिमि।

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत–** $1 \times 4 = 4$

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।।

**भावार्थः–** जनकः शैशवे .......... बहुमूल्यं विद्यारूपी धनं ददाति, येन बालकस्य विद्वत्तां दृष्ट्वा .......... यदा कथयन्ति यत् ''अस्य विदुषः जनकः कीदृशं तपः कृतवान?'' अर्थात् अस्य पिता .......... तपस्वी वर्तते, इति कथनमेव पितरं प्रति कृतज्ञता वर्तते। .......... विद्याधनमेव सर्वधनप्रधानमस्ति।

| **मञ्जूषा–** महान्, जनाः, सुताय, वस्तुतः |
|---|

**उत्तरम् :**

**भावार्थः–** जनकः शैशवे **सुताय** बहुमूल्यं विद्यारूपी धनं ददाति, येन बालकस्य विद्वत्तां दृष्ट्वा **जनाः** यदा कथयन्ति यत् ''अस्य विदुषः जनकः कीदृशं तपः कृतवान?'' अर्थात् अस्य पिता **महान्** तपस्वी वर्तते, इति कथनमेव पितरं प्रति कृतज्ञता वर्तते। **वस्तुतः** विद्याधनमेव सर्वधनप्रधानमस्ति।

**17. अधोलिखित–कथांशं समुचित–क्रमेण लिखत–** $1/2 \times 8 = 4$

1. किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत्।
2. उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ।
3. स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्।
4. सः शवः प्रावारकमपसार्य सर्वमपि वृत्तान्तं न्यायाधीशं निवेदितवान्।
5. न्यायाधीशः उभाभ्यां पृथक्–पृथक् विवरणं श्रुतवान्।
6. न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।
7. न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान्।
8. आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत्।

**उत्तरम् :**

1. स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्।
2. न्यायाधीशः उभाभ्यां पृथक्–पृथक् विवरणं श्रुतवान्।
3. किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत।
4. न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान्।
5. उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ।
6. आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत्।
7. सः शवः प्रावारकमपसार्य सर्वमपि वृत्तान्तं न्यायाधीशं निवेदितवान्।
8. न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।

**18. 'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति। तानि यथासमक्षं लिखत–** $1 \times 3 = 3$
**(केवलं प्रश्नत्रयम्)**

| क | ख |
|---|---|
| जवेन | कष्टप्रदानेन |
| तोदनेन | तीव्रगत्या |
| ऊढ्वा | कृषकः |
| कृषीवलः | आदाय |

**उत्तरम् :**

| | | |
|---|---|---|
| जवेन | = | तीव्रगत्या |
| तोदनेन | = | कष्टप्रदानेन |
| ऊढ्वा | = | आदाय |
| कृषीवलः | = | कृषकः |

**अथवा**

**अधोलिखितवाक्येषु रेखांकितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत– (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. बलीवर्दः जवेन गन्तुम् अशक्तः आसीत्।
(क) सुराधिपः
(ख) वृषभः
(ग) प्रवर्षः
**उत्तरम् :** (ख) वृषभः

2. सुधियः सख्यम् सुधीभिः सह भवति।
(क) खरः
(ख) वायसः
(ग) विद्वांसः
**उत्तरम् :** (ग) विद्वांसः

3. वानरः आगत्य तस्य पुच्छं धुनोति।
(क) आन्दोलयति
(ख) आख्याति
(ग) पालयति
**उत्तरम् :** (क) आन्दोलयति

4. पुत्रं द्रष्टुं सः प्रस्थितः।
(क) गतः
(ख) पुंसः
(ग) जागृतः
**उत्तरम् :** (क) गतः

WWW.CBSE.ONLINE

Download unsolved version of this paper from
www.cbse.online